# भक्तिप्रस्थाने नारदीयभक्तिसूत्राणां योगदानम्

Dr. V. N. Damodaran Unni,

भज् सेवायामिति धातोः क्तिन् प्रत्यययोगेन निष्पन्नं रूपं भवति भक्तिः। परन्तु शब्दोऽयं ईश्वरसेवायां रूढो भवति। वेदकालादारभ्य भक्तिचिन्ता अत्रासीदिति वैदिकसाहित्यादेव भक्तिपरामर्शान् स्वीकृत्य वक्तुं शक्यते। प्रायेण स्तुतिपराः सर्वेऽपि मन्त्राः भक्तिप्रधाना एव। 'अग्निमीले पुरोहितं' इत्युदाहरणम्। किन्तु इयं भक्तिचिन्ता सम्प्रदायरूपेण वैदिकानन्तरकाले परिवर्तिता। इतिहासपुराणेषु भक्तिपरामर्शाः बहुलतया दृश्यन्ते। विशिष्य श्रीमद्भागवतादिपुराणेषु भक्तिस्वरूपं प्राधान्येन निरूपितम्। तथा चानेकानि स्तोत्राणि च भक्तिमण्डले विद्यन्ते। सामाजिकपरिवर्तनानि अत्र भक्तिप्रस्थानोत्पत्तौ मुख्यो हेतुः। तदत्र न विचार्यन्ते। उपासनेत्युपनिषदादिषु या विस्तरेणोपदिष्टा सैवात्र भक्तिशब्देन यद्यपि व्यवह्रियते तथापि प्रस्थानरूपेण परिवर्तितायाः भक्तेरस्याः पृष्ठभूमिका ततोऽपि आचार्यैः विस्तारिता। शैववैष्णवभक्तिप्रस्थानप्रवर्तकाः अस्य सम्प्रदायस्य प्रमुखा आसन्।

अत्रेयं शङ्का स्यात्-का नामेयं भक्तिः। किं वास्याः स्वरूपं इति। इतिहासपुराणेषु प्रश्नस्यास्य समाधानं दृश्यते तथापि भक्तिप्रस्थानस्य अधिकारिनिरूपणं शाण्डिल्यनारदादीनां सूत्रग्रन्थेषु स्पष्टतया कृतं अस्ति।

नारदभक्तिसूत्रस्य पौर्वकालिकत्वमस्ति शाण्डिल्यसूत्राणामिति वक्तुं शक्यते। नारदीयभक्तिसूत्रे शाण्डिल्यपरामर्शात् युक्तमेतत्। ब्रह्मसूत्रादीनि तत्तद्दर्शनानां प्रमाणग्रन्थत्वेन वर्तन्ते। तद्वद्भक्तिदर्शनस्य प्रमाणग्रन्थो भवति नारदभक्तिसूत्रमिति वक्तुं युक्तम्। यतोऽत्र भक्तेः सर्वेऽपि प्रविभागाः ८४ सूत्रैः प्रतिपादिताः सन्ति। तस्मादस्य ग्रन्थस्य भक्तिप्रस्थाने स्थानं न लघ्विति सिद्धम्। अतोऽत्र तत्किञ्चिद्विचार्यते।

ग्रन्थेऽस्मिन् पञ्चाध्यायाः सन्ति। तत्र प्रथमेऽध्याये परभक्तिस्वरूपं निरूप्यते। द्वितीये परभक्तिमहत्वं, तृतीये भक्तिसाधनानि, चतुर्थे भक्तिलक्षणं, पञ्चमे भक्तिमहिमा च विचार्यन्ते।

'अथातो भक्तिं व्याख्यास्यामः' इति सूत्रेण ग्रन्थारम्भः। एवमुपोद्घातसूत्रमुक्त्वा ततस्तत्स्वरूपं 'सा त्वस्मिन् परमप्रेमरूपा' 'अमृतस्वरूपा' चेति सूत्राभ्यां प्रदर्श्यते। भक्तिर्भगवति परमेश्वरे परमप्रेमरूपा भवति। तदुक्तं नारदपञ्चरात्रेऽपि-

मनोगतिरविच्छिन्ना हरौ प्रेमपरिप्लुता।
अभिसन्धिविनिर्मुक्ता भक्तिर्विष्णुवशङ्करी।। इति।

उक्तञ्च महाभारततात्पर्यनिर्णये मध्वाचार्येण-

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा।
ज्ञानपूर्वः परः स्नेहो नित्यो भक्तिरितीर्यते।।

अत्रोदाह्रियते नारदेन ऋषिणा 'यथा व्रजगोपिकानामिति'। सर्वात्मसमर्पणं निरर्गलस्मरणं च भक्तिलक्षणमिति स्वनिर्दिष्टस्य परमभक्तिस्वरूपस्य उदाहरणरूपेण नारदः गोपीरुदाहरति। गोपिकाभक्तिः श्रीमद्भागवतेऽपि एवमुक्ता-

या गोदोहनेऽवहनने मथनोपलेप-
प्रेंखेखरार्भरुदितो क्षणमार्जतनादौ।।
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो
धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः।। (श्री. भा. x 44:15)

भक्तिः सर्वैः साध्या इति अत्राचार्येण सूचिता। यतो ह्यत्र गोपिका एव निदर्शनम्। त्रैवर्णिकानामेव वेदाधिकारः। स्त्रीणां शूद्राणाञ्च तद्विहीनत्वात् न तेषां ईश्वरप्राप्त्युपायेषु कर्मसु प्रवृत्तिः स्यात्। किन्तु भक्तिसम्प्रदाये सर्वे मनुष्याः अधिकारिणो भवन्ति। तत्र वर्णजन्मादीनाधारीकृत्य अनधिकारित्वं न विधीयते। श्रीमद्भागवते को वाऽत्र अधिकारीति निरूप्यते।

न निर्विण्णः नातिसक्तो
भक्तियोगोऽस्य सिद्धिदः।[1]

द्वितीयेऽध्याये नवभिः सूत्रैः परभक्तिमहत्वं वर्ण्यते। भक्तिः कर्मज्ञानयोगेभ्योऽपि अधिकतरा भवति। यतो हीयं फलरूपा भवति। परभक्तिरियं सर्वासामपि साधनानां फलरूपं भवति। लक्ष्यं हि मार्गात् श्रेष्ठतरम्। तस्मात् सैव ग्राह्या मुमुक्षुभिरिति सूत्रेण परभक्तिरेव मोक्ष इति उच्यते। सा नान्यस्य कस्यचित्प्राप्तये उपायः न चोपाहृतम्। उक्तं च श्रीमद्भागवते-

तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम्।।[2]

अत्र कीर्तनमुक्तम्-

सा त्वस्मिन् परमप्रेमरूपेति परभक्तिस्वरूपमुक्त्वा प्रेमस्वरूपं निर्वक्ति अनिर्वचनीयं प्रेमस्वरूपमिति। एवं प्रेमस्वरूपनिरूपणेन चतुर्थाध्यायस्यारम्भः। प्रेमस्वरूपं अनिर्वचनीयमेव। तन्निर्णेतुं वर्णयितुं चाशक्यम्। तत्कथमित्युच्यते मूकास्वादवत् इति। उक्तं च-

एवं भागवतो रूपं सुभद्रं ध्यायतो मनः।
निर्वृत्या परया तूर्णं सम्पन्नं न निवर्तते।।[3]

तल्लक्षणानि वाच्यन्ते नाना मतभेदात्। इत्युक्त्वा पूजादिष्वनुरागः इति पाराशर्यः। कथादिष्विति गर्गः। आत्मरत्यविरोधेनेति शाण्डिल्यः। नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति च।[4] इति मतभेदप्रदर्शनपुरःसरं भक्तिलक्षणं तस्य उदाहरणानि च निर्धारितवान्।

पञ्चमाध्याये भक्तस्य महिमा उच्यते। भक्ता एकान्तिनो मुख्या इति तत्र प्रथमं सूत्रम्। भगवति अनन्यभक्तियुक्ताः मुख्यभक्ताः। साधनान्तरमवश्यंभावित्वं ऐकान्तिकत्वम्। साधनायाः लक्ष्यमीश्वर एव। ईश्वरप्राप्तिरेव एकान्तभक्त्या सिद्ध्यति। एवमीश्वरदर्शं न प्राप्ताः मुख्याः भक्ताः। उक्तञ्च श्रीमद्भागवते-

एकान्तिनो यस्य न कञ्चनार्थं
वाञ्छन्ति यो वै भागवत्प्रपन्नाः।
अत्यद्भुतं तच्चरितं सुमङ्गलं
गायन्त आनन्दसमुद्रमग्नाः।।[5]

एते भक्ताः तीर्थीकुर्वन्ति तीर्थानि सुकर्मीकुर्वन्ति कर्माणि सच्छास्त्रीकुर्वन्ति शास्त्राणि च। ते तन्मयाः भूत्वा परमानन्दमनुभवन्ति। तत्र तेषु नास्ति जातिविद्यारूपकुलधनक्रियादिभेदः। अत एव भक्तिशास्त्राणि माननीयानि भवन्ति। तद्वत् अहिंसासत्यशौचदयास्तिक्यादिसदाचाराः परिपालनीयाः। एवं सर्वदा सर्वभावेन निश्चिन्तैः भगवानेव भजनीयः।

परमेश्वरप्राप्तये उत्तमोत्तममार्गः भक्तिरेव भवति। यद्यपि भक्तिः एकैव भवति तथापि मुनिना तस्य एकादशप्रविभागाः उपवर्णिताः सन्ति इति वदन्ति जनजल्पनिर्भयाः एकमता कुमार-व्यास-शुक-शाण्डिल्य-गर्ग-विष्णु, कौण्डिन्य-शेषोद्धवीराणि-बली-हनूमत्-विभीषणादयो भवन्त्याचार्याः। अतः भक्तिप्रस्थाने

पूर्वं बहवः प्रवर्तिताः आसन्निति अवगन्तुं शक्यते। दौर्भाग्यवशात् एतेषां ग्रन्थाः कालःकवलीभूताः इव भान्ति। एवं पञ्चस्वध्यायेषु भक्तेः स्वरूपं सम्प्रदायश्च सविस्तरमत्र प्रतिपादितमस्ति।

एषां भक्तिसूत्राणां कर्ता नारद इति परम्परया विश्वसन्ति। इतिहासपुराणेषु प्रसिद्धः नारदमुनिरेव भक्तिसूत्राणां कर्ता इति सामान्यविश्वासः। 'नारं परमात्मविषयकं ज्ञानं ददाति इति नारद' इति नारदशब्दव्युत्पत्तिः। श्रीमद्भागवते नारदः स्वजन्मकथां उपदिशति व्यासाय युधिष्ठिराय च। वैदिककालादारभ्य प्रसिद्धेषु पुराणेतिहासेषु काव्येषु साहित्यग्रन्थेषु च नारदमुनिः सुप्रसिद्धः एव।

## References:

१. श्री. भा. ११.२०.8.
२. श्री. भा. २.१.५.
३. श्री. भा. ४.८.५२.
४. श्री. भा. १.१५.९.
५. श्री. भा. ८.३.२०.

**उपयुक्तग्रन्थसूची**

१. नारदभक्तिसूत्रम्, सम्पादकः हनुमानप्रसाद पोद्धार, गीता प्रेस्, गोरखपुर, १९९४ संवत्सरः।
२. श्रीमद्भागवतपुराणम्, गीता प्रेस्, गोरखपुर्.
३. शाण्डिल्यभक्तिसूत्रम्, श्रीज्ञानानन्दजीमहाराज-हेमराजश्रीकृष्णदास-श्रीवेङ्कटेश्वरप्रेस्, बोम्बे, १९७९.

Quotes .......

" Let the goals marked for us be a channel of joy and instrument of work ."

" A crowning Goal is achievable only through physical, mental and vital surrender"

Sri Aurobindo